International Journal of Sanskrit Research 2016; 2(2): 03-05

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(2): 03-05
© 2016 IJSR
www.anantaajournal.com
Received: 02-01-2016
Accepted: 02-02-2016

**स्वाती च्याटार्ज्जी**
गवेषिका, विश्वभारती, शान्तिनिकेतनम्
संस्कृत-पालि-प्राकृत विभाग

**Correspondence**
**स्वाती च्याटार्ज्जी**
गवेषिका, विश्वभारती, शान्तिनिकेतनम्
संस्कृत-पालि-प्राकृत विभाग

# अभिज्ञान-शाकुन्तले गौणनारीचरित्राणां नाटकीयम् तात्पर्यम्

**स्वाती च्याटार्ज्जी**

संस्कृतसाहित्यस्य तथा विश्वसाहित्यस्य उज्ज्वलतम ज्योतिष्कः महाकविः कालिदासः । सर्वोत्कृष्टां महाकाव्यं सर्वोत्कृष्टं खण्डकाव्यं सर्वोत्कृष्टं नाटकं च तेनैव विरचितम् । मालविकाग्निमित्रम्, विक्रमोरवशीयम्, अभिज्ञानशाकुन्तलम् च । तेषु अभिज्ञानशाकुन्तलम संस्कृतसाहित्यस्य सर्वश्रेष्ठं नाटकं । तस्मादुच्यते – ‘कालिदासस्य सर्वस्य अभिज्ञानशाकुन्तलम।’ तथा – काव्येषु नाटकं रम्यम् तत्रापि च शकुन्तला ।’ नाटकेषु शकुन्तला सर्वोत्कृष्टा । अस्य नाटकस्य आद्यन्तं सर्वाङ्ग सुन्दरम् । कालिदासस्य शकुन्तला अतीव प्रतिप्राणा, सुशीला, उदारचरित्रा, प्रकृतिप्रेमी, सखीभावापन्ना रमणी आसीत् । सा आत्मसम्मान रक्षणाय दुष्यन्तमपि परूषवाक्यम् अवदत् । तस्याः चारित्रिक तेजमपि अत्र लक्षणीयम् । दुष्यन्तशकुन्तलयोः मिलनार्थं कविकुलपतिः सखीद्वयस्य उपस्थापनं कृतवान् । ते अतीव वुद्धीमत्यौ शकुन्तलां प्रति ताषां अनीर्वचनीयं स्नेहं अस्माकं दृश्टिं आकर्षयति । अत्र कालिदास ग्रथितानां गौणनारीचरित्राणां विश्लेषनं, नाटके ताषां उपयोगिता, तात्पर्यम इति एतान् विषयान् आलोच्चयिष्यामि ।

## गौतमी

कण्वाश्रमे अन्यतमा वयस्का नारी तापसी गौतमी । सा अत्यन्त स्नेहमयी जननीतुल्या च । नाटकस्य तृतीयचतुर्थपञ्चमाङ्केषु दृष्टिपथमवरति । नाटकस्य तृतीयाङ्के शकुन्तलायाः तापविनाशाय शान्तिवारि हस्तेन प्रविशति शकुन्तलायाःपालिका माता गौतमी – ‘जाते अपि लघुसन्तापानि ते अङ्गानि । अनेन दर्भोदकेन निराबाधम् एव ते शरीरं भविष्यति । वत्से, परिणतो दिवसः । एहि । उटजम् एव गच्छामः ।’[1]
चतुर्थाङ्के पतिगृहे गमनकाले सा शकुन्तलायाः सह हस्तिनीपुरं गतवती। एवञ्च पञ्चमाङ्के दुष्मन्तस्य पार्श्वे शकुन्तलां उपस्थितकारणाय गौतमीं वयं पुनस्थामवलोकयामः । अस्मिन नाटके तस्याः अकृत्रिम स्नेहस्य परिचयदयं प्राप्नुमः ।
चतुर्थाङ्के तस्याः असाधारणं धर्यस्य परिचयं प्राप्नुमः । सा स्वयं शोकातुरः संवरणं कृत्वा शकुन्तलायाः विदायकालीन आचारानुष्ठानस्य व्यवस्था करोति । माता भर्तृगृहगामिनीं कन्यामुपदिशति तथैव मातृकल्पा मातुरधिका वा गौतमी पतिगृहगामिनीं शकुन्तलामुपदिशति – ‘एतावान् वधुजनस्योपदेशः । जाते ! एतत्खलु सर्वमवधारय’[2] इति । कण्व शकुन्तलयोः स्नेहावेगमयसंलापे विलम्वाधिक्यं विचार्य सा कथयति – ‘जाते परिहीयते गमनवेला निवर्तय पितरम् । अथवा चिरेणापि पुनः एषा एवं मन्त्रयिष्यते । निवर्ततां भवान् ।’[3]
पञ्चमाङ्के यदा दुष्यन्तः शकुन्तलां स्वीकर्तुं नेच्छति तदा गौतमी शकुन्तलाया अवगुण्ठनम् उन्मोच्य राज्ञः विश्वास उत्पादनाय तापसीसुलभं सारल्यं प्रकाशयति । यथा गौतमी आह – ‘जाते, मुहूर्त्तं मा लज्जस्व ।अपनेष्यामि ते अवगुण्ठनम् । ततः त्वां भर्ता अभिज्ञास्यति ।’ आत्मानं प्रति दुष्यन्तस्य कटुक्तिं सा उपेक्षिता किन्तु शकुन्तलां प्रति अपमानं सा सह्य न करोति । सा आत्मापेक्षा शकुन्तलां प्रति अधिकम् स्नेह करोति – ‘महाभाग, न अर्हसि एवं मन्त्रयितुम् । तपोवनसंवर्धितः अनभिज्ञः अयं जनः कैतवस्य ।’[4]

---

[1] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-223

[2] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-292

[3] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-298

[4] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-357

असहाय क्रन्दनरतां शकुन्तलां दृष्ट्वा सा न धर्यस्थिता । दुष्यन्तः तथा शकुन्तलायाः गान्धर्वविवाह अनुमोदन करण्येऽपि गौतम्याः मनसिऽपि (कण्वेन सह) क्रोधः आसीत्इति मन्ये । गौतमी वक्ति –

'नापेक्षितो गुरुजनोऽनया न त्वया पृष्टो बन्धुः ।
एकैकमेवं चरिते भणामि किमेकैकम् ।। (अ.भि.5.16)

इत्यादि सारल्यौपूर्ण वाक्य तस्याकृते प्रामान्य आप्नुयात् । शकुन्तलां प्रति एमत कटुक्ति आचरणं तथा मन्तव्यं अनुचितः । गौतम्या सह राज्ञः दुष्यन्तस्य प्रथमसाक्षात भिन्नासीत् । गौतमी शश्रूमाता दुष्यन्तः जामाता गौतमीजामाताया सह साक्षातकाले सम्यक अस्ति वा इदृशम् भवति वाक्य किन्तु अस्माभिः न तदेव आचरणं प्राप्यते । एवञ्च युस्माकम् समस्या स्वयमेव विज्ञायन्ते । ईदृशरूपवाक्यं गौतमीमुखात् श्रुयते । यत् शकुन्तलां ग्रहनार्थं कृते न आगतवान् तदेव प्रेशनाय अहम् आगच्छामि । अतः क्रोधः तिष्ठेव शकुन्तला या मिथ्यावादी नास्ति नृपः अकारणे मिथ्यापवादे शकुन्तलां प्रत्याखान करोति स्म । इयं विश्वासः गौतमी कृते अटुट् आसीत् । दुष्यन्तेन प्रत्यादिष्टां स्वजनमनुगच्छतीं रोरुद्यमानां शकुन्तलां वीक्ष्य गौतमी स्नेहाधिक्यादतीव व्याकुला जायते – 'वत्स, शाङ्र्गरव, अनुगच्छति इयं खलु नः करूणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु ।'[5] इत्थ्यमजनन्यपि गौतमी स्नेहसिक्तभावातिरेकात् शकुन्तलाया जननीव शुभचिन्तिका संरक्षिका चेति नात्र सन्देहः ।

महर्षेः कण्वाश्रमस्य तापसी गौतमी अभिभाविकारूपेण महतीं भुमिका पालयति । शकुन्तलाः तथा सखीन् प्रति अतीव स्नेहभावः गौतम्याः चरित्रगौरवं प्रकाशयति । शकुन्तलाविदायकाले तापसी गौतमी एव गमनविलम्वविषये महर्षिकण्वं स्मारयति । अत्र तस्याः विचक्षणता प्रकाशिता । नाटकस्य तृतीये अङ्के दुष्मन्त-शकुन्तलायोः एकान्ते मिलनदृश्यं शान्तिवारिहस्तेन गौतम्याः प्रवेशेन अपसारितम् । अतः सामाजिकशालीनतारक्षणाय गौतम्याः चरित्रम् अतीव महत्वपूर्णम् । अस्मिन विषये स्मरणीया कविगुरोः रवीन्द्रनाथस्य इयमुक्तिः – "सखी विरहिता शकुन्तला एतइ सुस्पष्टरूपे, असहाय असम्पुर्ण अनावृत भावे चोखे पडे ये, ताहार दिके येन भालो करिया चाहिते संकोच बोध हय – माझखाने आर्या गौतमीर आकस्मिक आबिर्भावे पाठकमात्रेर मने आराम बौध हय ।"[6] पतिगृहगमनकाले गौतमी शकुन्तलया सह हस्तिनापुरं गतवती । शकुन्तला नारी। अतः काऽपि नारी शकुन्तला साकं अवश्यमेव प्रेषितव्या । सखीद्वयस्य हस्तिनापुरगमनं न समुचितम्। अभिनवमधुलोलुपः दुष्यन्तः, सखीद्वयं च नवयौवनवती । गौतमी हस्तिनापुरं गत्वा नाटकीयप्रयोजनं साधयति।

### दुष्मन्तमाता

अस्मिन् नाटके नृपस्य दुष्मन्तस्य जनन्या अप्युल्लेखो मिलति । द्वितीयाङ्के दौवारिकमुखात् ज्ञायते यत् नगरात् देवीनीमाज्ञप्तिहरः करभकः आगतः इति । करभको नृपस्य सविधे समागत्य निवेदयति यत् आगमिनि चतुर्थ दिवसे पुत्र पिण्डपालनो नाम उपवासो भविष्यति । तत्र दीर्घायुषा अवश्यं वयं सम्भावयितव्या इति । माता अपुत्रकस्य दुष्मन्तस्य सन्तानार्थं पुत्रपिण्डपालनव्रताचारणाय यतते । पौत्रमुखदर्शनसुखलिप्सायां हि भारतीयपितामहीनां प्रवृत्तिः स्वभाविकी । दुष्यन्तस्य नृपस्य जनन्याश्चरित्रेण एतत्सर्वं स्फुटीकृतं कालिदासेन ।

शाकुन्तले द्वितीये अङ्के तापसाः राक्षसेभ्यः आश्रम रक्षणाय दुष्मन्तम् अनुरोधं कुर्वन्ति । तस्मिन्नेव क्षणे करभक दुष्मन्तस्य मातुः उपवासभङ्गस्य संवादं नीत्वा तत्र आगतः । करभकेन ज्ञापितम् – राजमाता उपवासभङ्गे दुष्मन्तस्य उपस्थिति कामयति । परन्तु दुष्मन्तः विदुषकं तत्र प्रेषयति । विदुषकः चपल स्वभावः । राजा शकुन्तलाप्रणयविषये विदुषकं किमपि ज्ञापितुमं नेच्छति । राजमातायाः आदेशेन विना तस्य हस्तिनापुरे प्रत्यावतनं असम्भवः स्यात् । दष्मन्त-शकुन्तसयोः निभृतमिलने तथा प्रणयवृतान्तसङ्गोपने राजमाता परोक्षभावेन साहाय्यमकरोत् ।

### मेनका

अभिज्ञानशाकुन्तलम् नाटके कुत्रापि मेनकाया उपस्थिति न दृश्यते । परन्तु तस्या उल्लेख अस्ति । यद्यपि अस्मिन् नाटके तस्या उपस्थिति न दृश्यते। परन्तु शकुन्तलायाः मातुः मेनका चरित्रं अवश्यमेव आलोचनीयम् । मेनका तु शकुन्तलायाः माता । एकदा विश्वमित्रस्य उग्रतपप्रभावेन इन्द्र पीडितःऽभूत्। तस्य तपभङ्गाय इन्द्रः अप्सरां मेनकां प्रेरितवान् । मेनकां प्रथममेव दृष्ट्वा विश्वामित्रः मुग्धा अभवत् । मेनकाया संसर्गेन ततः एका कन्या जाता । विश्वामित्रः मेनका च तां कन्यकां त्यक्त्वा अगच्छताम् । यदा दृश्यते महाभारते कुमारीमाता कुन्ती तस्याः आत्मजं कर्णं परित्यक्तवती । अत दृश्यते यत् मेनका अतीव स्वार्थपरा रमणी आसीत् । सा तस्या आत्मजं अत्यजत् । तस्याः कन्यायाः किं भवेत् इति चिन्तानं न तया कृतम् । सा केवलं आत्मनः सम्मानरक्षाय एवं कृतवाती । परित्यागकाले तस्याः मातृहृदयस्य व्यकुलता तस्याः आत्मसम्मानं प्रति न सूचिता । अस्मात् कारणात् तस्याः चरित्रामहिमा अतीव म्लानियुक्ता अभवत् ।

परन्तु अत्र प्रश्न जायते यदि मेनकायाः किमपि महत्वं नास्ति तर्हि नाटकस्य सप्तमाङ्के अदिति कथं उक्तवान् – "भगवन्, अनया दुहितृमनोरथसंपत्त्या कण्व अपि तावत् श्रुतविस्तारः क्रियताम् । दुहितृवत्सला मेनका इह एव उपचरन्ती तिष्ठति ।"[7] अत्र लक्षणीयं यत् अत्र अदिति विश्वामित्रस्य नामोल्लेखं न कृतवान् । तस्य स्थानं नयति तातकण्वः । कण्वस्य उदारचरित्रं विश्वविश्रुतम् । मेनका अपि एतत् जानाति तस्मात् सा तस्याः कण्यां कण्वाश्रमं निकषा परित्यक्तवती । परन्तु सन्तानसम्भवा शकुन्तला यदा दुष्यन्तेन परित्यक्ता अभवत् तदा मेनकायाः मातृहृदयस्य वेदना प्रकाशिता अभवत् । सा तस्या सखीं सानुमतीं शकुन्तलां निकषा प्ररितवती तां मारीचाश्रमे आनयनाय । सानुमती शकुन्तलां मारीचाश्रमे आनितवती । दुष्यन्तेन परित्यक्ता सती शकुन्तला मातुः सान्निध्यं प्राप्तवती । तस्मात् दुष्यन्तं प्रति मारीचेन उक्तम् – "यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा, नान्यथेति ।"[8] शकुन्तलां प्रति मेनाकायाः स्नेहछाया सर्वदैव दृश्यते । सानुमती अपि वदति- "निवर्तितं मया पर्यायनिवर्तनीयमप्सरस्तीर्थसान्निध्यं यावत् साधुजनस्याभिषेककाल इति। साम्प्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्यामि । मेनकासम्बन्धेन शरीरभूता मे शकुन्तला । तया च दुहितृनिमित्तमादिष्टपूर्वास्मि ।"[9]

इत्थं स्पष्टं भवति यत् नियमविघ्नकारिनी मेनका अपि स्नेहशीला माता । तस्याः मातृरूपस्य प्रकाशसाधनम् व कविना अबिप्रेतम् । माता स्वाभाविकरूपेण स्नेहशीला । नाटकस्य षष्ठेऽङ्के मेनका-सानुमत्यौ असहायावस्थात् शकुन्तलां रक्षतः । अनेन प्रकारेण मेनका कन्यापरित्यागजनात् पापत् कालिमामुक्ता अभवत् ।

### सानुमती

सानुमती शकुन्तलायाः मात्रा मेनकाया प्रेरिता एका अप्सरा । मेनका तां शकुन्तलाप्रत्याख्यानादनन्तरं राज्ञः मानसिकावस्थां ज्ञातुं प्रेरितवती ।

[5] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-367

[6] प्राचीन साहित्य, रबीन्द्ररचनावली १०म खण्ड, पृ-

[7] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-546

[8] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-538

[9] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-391

एकाधिकं नाटकीयम् उद्देश्यं साधनाय कालिदासः सानुमतीचरित्रस्य अवतारणां कृतवान् । शकुन्तला दुर्वासासः शाप विषये न जानाति । तस्मात् दुष्यमन्तं प्रति शकुन्तलायाः स्वाभाविकी घृणा । सानुमती शकुन्तलां प्रति राज्ञः अकृत्रिमम् अनुरागं आश्रमकन्यां ज्ञापयित्वा दुष्मन्त-शकुन्तलयोः भाविमिलने सहायतां करोति । शकुन्तलां प्रति दष्मन्तस्य अनुरागः अस्ति न वेति – इति ज्ञाणाभावे तयोः पुनर्मिलनस्य काऽपि सार्थकता नास्ति । कालिदासः सानुमतीमाध्यमेन पुनर्मिलनं सार्थकतां प्रददाति । दुष्मन्त-शकुन्तलयोः पुनर्मिलने देवाः अपि आग्रहिणः – इति सानुमतीमुख्यात् ज्ञायते ।

**वसुमती**

अभिज्ञानशाकुन्तलम् नाटके ये ये चरित्राः राज्ञः दुष्यन्तस्य चरित्रप्रकाशने साहाय्यं कुर्वन्ति तेषु वसुमती अन्यतमा । मुख्यचरित्ररूपेण तस्याः उपस्थापनं न क्रियते । रङ्गमञ्चे तस्याः उपस्थितिः अपि न दृश्यते । नाटकस्य षष्ठेऽङ्के चतुरिकाः तस्याः नामोल्लेखं करोति । वसुमती राज्ञः दुष्यन्तस्य पत्नी । राजा दुष्यन्तः बहुपत्नीकः आसीत् । परन्तु देव्याः वसुमत्याः स्थानमतीव विशिष्टम् । देवी वसुमती राज्ञः प्रणयभाजनमासीत् । राजान्तःपुरे तस्याः अतीव प्राध्यानम् अस्ति । सा सदा दासीपरिवेष्टिता आसीत् । तरलिका परभृतिका मधुकरिका चतुरिका सर्वाः तस्याः सेवायां नियुक्ताः आसन् । राजा दुश्यन्तः तान् समीहं करोति । षष्ठऽङ्के यदा चतुरिका चित्राङ्कनसामग्रीं नीत्वा राज्ञः निकषा गच्छति तदा देवी वसुमती "अहमेव आर्यपुत्रस्य उपनेष्यामि"[10] इति उक्त्वा सवलात्कारं तत् सामग्रीं गृहतवती । राज्ञं प्रति तस्या प्रणयः विद्यमानः । यद्यपि राजा शकुन्तलासक्तं तथापि राजा प्रथमप्रणयस्य गरिमां रक्षति । राजा तां दृष्ट्वा अतीव आनन्दितो भवेत इति । चिन्तयित्वा सा स्वयं राज्ञः समीपे गतवती । अथः नारीजनोचिताया विषये सा पटीयसी आसीत् । देवी वसुमती अतीव अभिमानिनी आसीत् । तस्मात् राजा विदूषकः वदति – "वयस्य उपस्थिता देवी वहुमानगर्विता च ।"[11]

अनेन प्रकारेण दृश्यते यत् महाकविकालिदासः अतीव सुन्दररूपेण स्त्री चरित्राणां उपस्थापनं कृतवान् । दुष्यन्तस्य पत्न्याः हंसपदिकाया संङ्गीतमाध्यमेन तस्मिन् युगे नारी शिक्षाया तथा कलाविद्या चर्चायाः परिचयं वयं प्राप्नुमः । शकुन्तलायाः मातुः मेनकायाः चरित्रमपि अतीव आकर्षनीयम् या मेनका वाल्यकाले शिश्कन्यां शकुन्तलां परित्यक्तवती, दुष्यन्तेन प्रत्याख्याता सती तस्याशकुन्तलायाः साहाय्यार्थं सा सानुमतीं प्रेरितवती । कालिदासः अत्र आचार परित्यागिनि मेनकां मातारूपेण उपस्थापितवान् । शकुन्तलायाः पालिका माता भुत्वा अपि गौतम्याः अकृत्रिमं स्नेहं तस्या चरित्रोत्कर्षं प्रकाशयति । अनेन प्रकारेण दृश्यते यत् महाकवि स्त्री चरित्र चित्रणे वास्तवतयाः सामाजिकतयाः तथा मनोवैज्ञानिकतयाः परिचयः दत्तवान् ।

**सन्दर्भग्रन्था**


1. चक्रवर्ती सत्यनारायण । अभिज्ञानशकुन्तलम् – कालिदासः । संस्कृत पुस्तक भाण्डार, कलिकाता, २००४।
2. द्विवेदी शिवप्रशाद । अभिज्ञानशकुन्तलम् – कालिदासः । भारतीय विद्या प्रकाशन, वाराणसी दिल्ली, १९९५।
3. शास्त्री हरदत्त, द्विवेदी शिववालक । अभिज्ञानशकुन्तलम् – कालिदासः । ग्रन्थम्, कानपुर, १९८३ ।
4. घटक कल्यानीशङ्कर । रवीन्द्रनाथ ओ संस्कृत साहित्य । वर्धमान विश्वविद्यालय, वर्धमान, १९८०।
5. जोशी मोतीलाल, शर्मा सरोज, पंचोली बद्रीप्रसाद । संस्कृत वाङ्मय में नारी ।द देवनागर प्रकाशन, जयपुर, २००१।


[10] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-447

[11] अभिज्ञानशकुन्तलम्, श्री सत्यनारायण चक्रवर्ती. पृ-447